International Journal of Sanskrit Research 2021; 7(1): 364-367

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 364-367
© 2021 IJSR
www.anantaajournal.com
Received: 07-11-2020
Accepted: 09-12-2020

**विष्णुपदसाऊः**
शोधछात्रः, श्री जगन्नाथ संस्कृत विश्वविद्यालयः, ओडिशा, भारत

**Corresponding Author:**
**विष्णुपदसाऊः**
शोधछात्रः, श्री जगन्नाथ संस्कृत विश्वविद्यालयः, ओडिशा, भारत

# सङ्कटसमाधाने भागवद्गीता

## विष्णुपदसाऊः

### सारांश
सङ्कटसङ्कुलं हि मानवजीवनम्। सङ्कटविहीनावस्थां कुत्रापि न परिदृश्यन्ते। एकः सङ्कटः समाहितश्चेदपरः समायाति। समष्टिजीवने व्यष्टिजीवने च सङ्कटाः निरविच्छिन्नरुपेण सन्ति। कर्ममार्गिनां भक्तिमार्गिनां ज्ञानमार्गिनाञ्च सर्वेषां सङ्क्टाः सन्ति। सामाजिकजीवने पारिवारिकजीवने राष्ट्रियजीवने कर्मजीवने सर्वत्रैव विद्यते सङ्कटाः। परन्तु सङ्कटसमाधाने अस्माकं कर्तव्यं किम् अस्ति? किं वा तत् उपायम्? तस्मिन् विषये इदम् शोधपत्रम्। विविधेषु कर्मषु निष्कामकर्म एव सर्वदा आश्रयनीयः। वर्तमानसमाजव्यवस्थायाम् लक्ष्यते यत् स्वस्व- कर्तव्यकर्मषु, आश्रमोचितधर्माचरणे वा जनाः पराङ्मुखाः। अतः तेषां कृतेऽपि वार्तामस्ति अत्र। आधुनिकयुगस्य वर्णभेदसङ्कटमोचनस्य उपायम् अपि अत्रास्ति।वर्णव्यवस्था जन्मानुसारिणी न, कर्मानुसारिणी भवेत्। एतेन सत्कर्मण्यनुरुध्य शुद्र अपि ब्राह्मणत्वं लभते। अज्ञानेन आच्छन्नाः जनाः केवलं वदन्ति मां न स्पृश प्रभृतयः। एतेन समाजस्य गतिः विध्वस्ता भवति। अतः सर्वभूतेषु ब्रह्मदर्शनं कुर्यात्। ब्रह्मदर्शनस्योपायमपि वर्णनम् अस्ति। सभ्यतायाः ध्वंसस्य मूलकारणम् हिंसा। अत्र हिंसा परित्यगस्योपायाः वर्णितम्। षडरिपुषु कामः क्रोधः च अस्माकं शत्रुस्वरूपः। स्वस्थमनसा कामः क्रोधः च नियन्त्रितः भवति। अतः मनः स्वस्थाय किम् किम् करणीयम् तस्योपायम् वर्णितम्। मोक्षप्राप्तेरुपायः वर्णितः। व्यवहारेण रिपुः जायते। केन सह कीदृशं व्यवहारं कर्तव्यम् तदपि वर्णितम्। सर्वेषां मानवानां कृते एवमेव वार्तामस्ति यत् मनसि धर्मविद्वेषभावना न स्यात्। एतेन जनानां तथा राष्ट्रस्य विकाशः भविष्यति। एतानि विषयाण्याधारिकृत्य मम शोधकार्यम्।

**कूटशब्द:** सङ्कटसमाधाने भागवद्गीता, मानवजीवनम्, कर्ममार्गिनां

### प्रस्तावना:
अस्मिन् युगे विश्वस्यैक्यवद्धत्वं महत्त्वपुर्णं वर्तते। समाजे विश्वे यानि भूतानि सन्ति, तानि आत्मवत् भावयन्तु। विद्यमानाः सर्वे सुखिनः स्युः, सर्वे निरोगिणः भवन्तु, कोऽपि दुःखं न प्राप्नुयात्। विश्वे अथवा व्रह्माण्डे ये प्राणिनः सन्ति ते सुखिनः भवन्तु – इति भावनायाः आवश्यकता वर्तते। परन्तु आधुनिकयुगे एतस्याः भावनायाः विलोपं परिदृश्यते। एतदर्थं मानवजीवनं सङ्कटसङ्कुलं भवति। एकः सङ्कटः समाहितश्चेदपरः समायाति। समष्टिजीवने व्यष्टिजीवने च सङ्कटाः निरविच्छिन्न रुपेण सन्ति। एतत् सङ्कटं निवारणार्थं भागवद्गीता पथनिर्देशकरुपेणास्ति। समाजस्य अभ्युदये परिवारस्य महद्योगदानं भवति। सर्वेषां प्राणिनां प्रवृत्तिः सुखार्था न तु दुःखार्था। सामाजिकविकासस्य, सभ्यतायाः समुन्नतेः, नराणां क्रियाकलापस्य, सामाजिकव्यवस्थायाश्च महत्वपूर्णम् इतिवृत्तं गीतायां प्राप्यते।

सम्प्रति भारतीयजनानामाचार-विचारधर्मकर्मादीनां ज्ञानार्थं गीताध्ययनं परमावश्यकमस्ति। श्रीमद्भागवद्गीता भारतीयसंस्कृतेः मूलरुपा, प्राणभूता, गुणभूताश्च। गीतेयं सर्वासाम् उपनिषदां सारम् अपि वर्तते। गीतायाः स्थानं भारतीयदर्शनग्रन्थेषु शिखरे वर्तते। ज्ञानगरिमान्विता गीता आत्मनः स्वरुपम् अवबोधयति, स्थितप्रज्ञता सिद्धयति, निष्कामकर्मयोगं निष्पादयति, ज्ञान-कर्म-भक्तिमार्गस्य सन्धानं प्रदर्शयति। श्रीमद्भागवद्गीतायां बहवः कल्याणकराः मोहाज्ञानविनाशकाः सत्सरुपाः उपदेशाः भगवता प्रतिपादिताः। अत्र सर्वोपनिषदां सारः मनोज्ञया प्रणाल्या साधुतरं विविच्यते। श्रीकृष्णः गोस्वरूपाणामुपनिषदां दोग्धा पार्थः गोदोहनकाले स्तनन्धयत्वेन समुपस्थितो वत्सः, सुधियश्च तस्य गोदोहस्य दुग्धामृतस्य भोक्तारः।

गीता समग्रस्यापि पूर्ववर्तिनो वाङ्मयस्य सारम् उपस्थापयति। अतः गीता लोकप्रिया अभवत्। कथितं च –

> सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
> पार्थो वत्सः सुधिर्भोक्ता, दुग्धं गीतामृतं महत्।।

न केवलं तत्, गीतायाः भाषाशैली तादृशी मनोरमा, प्रसादगुणयुक्ता, ज्ञानविज्ञानसमन्विता च यत् स्वल्पशिक्षाप्रबुद्धोऽपि मानवा अस्याः सामान्यमर्थम् अवगन्तुं शक्नुवन्ति। उक्तं च –

> गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
> या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता।।

जीवनं समस्यामयम् अस्ति। कर्ममार्गिनां भक्तिमार्गिनां ज्ञानमार्गिनाञ्च सर्वेषां सङ्कटाः सन्ति। सामाजिकजीवने पारिवारिकजीवने राष्ट्रियजीवने कर्मजीवने सर्वत्रैव विद्यते सङ्कटाः। परन्तु सङ्कटसमाधाने अस्माकं कर्तव्यं किम् अस्ति? इत्यस्मिन् विषये वयं दिवारात्रौ चिन्तयामः। समस्यामेतेषां समाधानाय गीतायाः भूमिका शिखरे वर्तते। समाजे स्थितानां प्राणिनां कृते कर्म एव अनिवार्यम्। कर्म विना किमपि न सिध्यति। प्रकृतिजगुणैः वशवर्तीनः प्राणिनः कर्म विना स्थातुं न शक्नुवन्ति-

> न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
> कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैगुणैः [1] ।।

परन्तु अधुनायतनयुगे मानवाः कर्मविमुखं भवन्ति। न केवलं सर्वकारस्य सहायप्रार्थिषु जनेषु, अन्येषु जनेषु अपि एतादृशं परिलक्ष्यते। जनाः श्रमविमुखा अपि भवन्ति। बहवः जनाः कर्मफललाभस्य आशायाः विमुखाः सन्ति, निष्फललाभस्य कारणात्। परन्तु तेषां कृते गीतायाः वचनम् अवश्यम् एव स्मरणीयम्।

> कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
> मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि [2] ।।

अतः अनासक्तभावेन कर्म कर्तव्यम्। कर्म विना शरीरनिर्वाहं न भवति। मानवाः मनसा कर्माणि साधयन्ति। मनः चञ्चलः। अतः सर्वाग्रे मनः संयम्य कर्मेन्द्रियेन कर्मयोगं पालनीयम्। तदुक्तं गीतायां भगवता –

> यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुनः।
> कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते [3] ।।
> नियतं कुरु कर्म त्वं कर्म ज्यायोः ह्यकर्मणः।
> शरीरयात्रापि च ते न प्रसिद्धयेदकर्मणः [4] ।।

मानवाः देवाः च कर्तव्यपरिपालनेन कल्यानं लभन्ते –

> देवान् भावयतानेन ते देवा भावयन्तु वः।
> परस्परं भावयन्तः श्रेयः परमवाप्स्यथ [5] ।।

अनेकसमये एवम् अपि परिदृश्यते यत् ज्ञानवन्तः जनाः स्वप्रशंसायां निरताः भवन्ति। ते अज्ञानीनां कृते कटुभाषणेन प्रदुषणं कुर्वन्ति। परन्तु एवं न कुर्यात्। एतस्मिन् विषये गीतायाम् उक्तम् –

> न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
> जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् [6] ।।

अस्मिन् संसारे भारतीयवर्णव्यवस्था वैदिककालाद् आरभ्य प्रचलिता अस्ति। वैदिककाले वर्णभेदसङ्कटः नासीत्। परन्तु आधुनिकयुगे वर्णभेदः सङ्कटरुपेन उपस्थितं भवति। वर्णोति शब्दस्य अभिप्रेतार्थः 'वर्णो वृणुतेः'(निरुक्त)। प्राचीनकाले आर्यऋषयः गुणकर्मविभागानुसारं वर्णभेदव्यवस्थां प्राचलायन्। मनुष्यः स्वजीवननिर्वाहार्थं यां कामपि वृत्तिम् आश्रयते, तदनुसारमेव तस्य वर्णनिर्णयः। यः कश्चन् तत् कर्म कुर्यात् स तं वर्णम् आश्रयेत्। स्वकर्मणैव ब्राह्मणो वैश्यत्वं शुद्रत्वं च लभते। एवमेव सत्कर्मण्यनुरुध्य शुद्र अपि ब्राह्मणत्वं लभते। तदा वर्णव्यवस्था जन्मानुसारिणी नासीत्, कर्मानुसारिणी आसीत्। अतः मनुना उक्तम् –

> शुद्रो ब्राह्मणतामेति ब्राह्मणाश्चेति शुद्रताम्।
> क्षत्रियाज्जातमेवं तु विद्याद् वैश्यात् तथैव च [7] ।।

भगवान् श्रीकृष्णः वर्णभेदव्यवस्थायाः मुख्यप्रवर्तकः आसीत्–

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् [8] ।।

परन्तु आधुनिककाले वर्णव्यवस्था जन्मानुसारिणी जन्ममुला वा। यः ब्राह्मणकुले जन्मं लभते परन्तु विप्रप्रतिकुलम् आचारं परिपालयति सोऽपि ब्राह्मणः। यः शुद्रकुले जन्मं लभते परन्तु विप्रानुकुलम् आचारं परिपालनेन अपि सः ब्राह्मणः न भवति, शुद्ररुपेण तिष्ठति। एतेन समाजस्य हानिः भवति। आपस्तम्बधर्मसूत्रेऽपि एतद् एव विशदीक्रियते यद् धर्मचर्यया वर्णोत्कर्षं लभते, अधर्मचर्यया च वर्णापकर्षम् भवति।

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ।
अधर्मचर्यया पूर्वो वर्णो जघन्यं वर्णमापद्यते जातिपरिवृत्तौ [9] ।।

अतः एवमेव आशयः यत् सर्वे स्वगुणानुसारं योग्यतानुसारं वा कर्म कुर्युः। कर्म विना कोऽपि जीवितुं नैव शक्नोति। कर्मणा समाजस्य कल्यानसाधनं भवति।
आधुनिकसभ्यतायाः ध्वंसस्य मूलकारणम् भवति हिंसा। अतः हिंसा वर्जनीया। 'अतः श्रुयते यत्- अहिंसा परमो धर्मः।' अस्मिन् भारतवर्षे प्राचीनकालाद् आरभ्यः अहिंसायाः महत्त्वं वर्तते।'न हिंसा इति अहिंसा' इति विग्रहानुसारेण हिंसेति शब्दः निष्पद्यते। सामान्यरुपेण जनाः प्राणीहननं हिंसारुपेण विविच्यते। मनसा, वाचा, कर्मणा नैव कस्यापि अहितचिन्तनं, कटुभाषणम्, अप्रियम् आचरणमेव अहिंसा भवति। अर्थात् सर्वविधहिंसापरित्याग एव अहिंसा इति। अहिंसायाः महत्त्वम् उपस्थाप्य मनुना उक्तम् –

अहिंसा सत्यमस्तेयं शौचमिनिद्रयनिग्रहः।
एवं सामासिकं धर्म चातुर्वर्ण्येऽब्रवीन्मनुः [10] ।।

अहिंसया जीवनयापनेन मनसः कष्टं दूरीभूतं भवति। हिंसात्यागेन मनसि प्रेमभावना आयाति येन राष्ट्रहितं विश्वहितं सम्पादयितुं शक्यते। अतः गीतायाम् उक्तम् –

अहिंसा सत्यमक्रोधत्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् [11] ।।

अहिंसया शत्रवः अपि मित्राणि भवितुं शक्नुवन्ति। कुजनाः अपि सरलाः भवन्ति। हिंसात्यागेन असम्भवानि कार्याणि अपि सिद्ध्यन्ति। सांसारिकदुःखानाम् आत्यन्तिकनिवृत्तिपूर्वकं शाश्वतसुखप्राप्तिरुपाय दर्शनम् अस्माकं प्रधानं लक्ष्यम्। सांसारिकसुखदुःखभोगः एव बन्धनम्, तन्निवृत्तिश्च मोक्षः। वेदादिषु सर्वेषु अपि शास्त्रेषु परमपुरुषार्थः मोक्ष एव। गीतायाम् परमात्मादर्शनमेव मोक्षः। परमात्मा भवति वासुदेवः।
अतः गीतायाम् उक्तम् –

वहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः [12] ।।

भगवान् अस्य जगतः वीजस्वरुपः – 'यच्चापि सर्वभूतानां वीजं तदहमर्जुन' [13], 'वीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्' [14] । साधकेषु यावत् पर्यन्तम् अहमिति भावः स्थास्यति तावत् पर्यन्तं साधकः भोगीरुपेण विराजते। यथा- अहम् योगी इत्यनेन योगस्य भोगः प्रतिपाद्यते। अहं ज्ञानी इत्यनेन ज्ञानस्य भोगः प्रतिपाद्यते। अहं प्रेमिकः इत्यनेन प्रेमस्य भोगः दृश्यते। यः योगस्य भोगी सः कदापि विषयस्य भोगी अपि भवितुं शक्नोति, यः ज्ञानस्य भोगी सः कदापि अज्ञानस्य भोगी अपि भवितुं शक्नोति। एवमेव यः प्रेमस्य भोगी सः कदापि अनुरागस्य भोगी अपि भवितुं शक्नोति। भोगस्य प्रवृत्तयः संस्काराः च एतेषां कारणं भवन्ति। यदा साधकानां मनसः एतेषां विनाशः भवति तदा 'वासुदेवः सर्वम्' इति अनुभवं भवति। एतेन मोक्षप्राप्तिः भविष्यति। अतः भगवता श्रीकृष्णेनोक्तम् –

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः [15] ।।

धर्मविद्वेषम् अवलम्व्य साम्प्रदायिककलहादिरपि आधुनिकसमाजस्य सङ्कटाः विचरन्ति। एतस्मात् कारणात् एव राष्ट्रस्य विभाजनं भवति। समाजेषु स्थितेषु जनेषु अपि धर्मविद्वेषभावना परिदृश्यते। साधनद्वारेन एव ईश्वरः लभ्यते इति श्रीरामकृष्णेन सर्वधर्ममतानुसारं उद्घोषितम्। एतस्मिन् विषये गीतायाम् उक्तम् –

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थः सर्वशः [16] ।।

अतएव सर्वेषां मानवानां कृते एवमेव वार्तामस्ति यत् मनसि धर्मविद्वेषभावना न स्यात्। एतेन जनानां तथा राष्ट्रस्य विकाशः भविष्यति। गीतावचनानुसारं सर्वधर्मविद्वेषं विस्मृत्य परस्परमैत्रीभावनया धर्माचरणेन जगति शान्तिः आगमिष्यति। व्यवहारविषये अपि सुवार्ताम् अस्ति गीतायाम्। केन सह कीदृशं व्यवहारं कर्तव्यम् तस्मिन् विषये गीतायाम् उक्तम् – 'समः शत्रौ च मित्रे च17।' अर्थात् यथा मित्रेण सह सुव्यवहारं कर्तव्यं तथा शत्रुना सह अपि।

व्यवहारेण रिपुः जायते। अतः सर्वेषां कृते सुव्यवहारं करणीयम्।

जागतिकभोगाय सम्पदसंग्रहस्य इच्छायां च विचारशीलः जनः अपि कर्तव्यकर्म विस्मृत्य पापकर्म कुर्वन्ति। पापकार्यस्य मूलकारणः भवति कामः। परन्तु मानवाः तस्य(कामस्य) विषये अवगन्तुं नैव शक्नुवन्ति। कामस्य प्रभावेन वलपूर्वकात् पापाचरणे समर्थाः भवन्ति। एतन्मिन् विषये दुर्योधनस्योक्तिर्यथा –

जानामि धर्मं न च मे प्रवृत्ति
र्जानाम्यधर्मं न च मे निवृत्तिः।
केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि [18] ।।

## सारांश

1. गीता – 3/5
2. गीता – 2/47
3. गीता – 3/7
4. गीता – 3/8
5. गीता – 3/11
6. गीता – 3/26
7. गीता – 10/65
8. गीता – 4/13
9. आपस्तम्ब – 1/2
10. मनु – 1/63
11. गीता – 16/2
12. गीता – 7/19
13. गीता – 10/39
14. गीता – 7/10
15. गीता – 18/66
16. गीता – 4/11
17. गीता – 12/18
18. गार्गसंहिता, अश्वमेधः – 50/36

## सहायकग्रन्थावली


1. आपस्तम्भ-धर्मसूत्रः डाँ उमेशचन्द्रपाण्डेः वाराणसी चौखम्वा संस्कृत संस्थान- द्वितीय- संस्करणम् -2006
2. गर्गसंहिता श्रीमान रामशास्त्री (अनुवादक) तारालाईव्रेरी,कोलकाता-2015
3. निबन्ध-मंजूषा डाँ उदयशंकर झा चौखम्बा सुरभारती-2013
4. वेदान्तपरिभाषा धर्मराजाध्वरीन्द्रः अनन्तकृष्णशास्त्रिमहोदयेन सम्पादितः कलिकाता-विश्वविद्यालयः –1930
5. भारतीयसंस्कृतिः डाँ किरण टण्डन ईस्टर्न बुक लिंकर्स, दिल्ली-2006
6. मनुसंहिता डाँ अन्नदाशंकरपाहाडी संस्कृतवुकडिपो द्वितीय-संस्करणम्-2008
7. मनुस्मृतिः गङ्गानाथ झाँ दिल्लि परिमल पब्लिकेशन-प्रथम- संस्करणम्-2004
8. योगभाष्यः व्यासदेवःगोस्वामिदामोदरशास्त्रिमहोदयेन सम्पादितः, काशीसंस्कृत सीरिज पुस्तकमाला - 110, चौखाम्वा संस्कृत सीरिज, वेनारस, 1935।
9. योगसूत्रः महर्षिः पतञ्जलिः गोस्वामिदामोदरशास्त्रिमहोदयेन सम्पादितः, काशीसंस्कृत सीरिज पुस्तकमाला - 110, चौखाम्वा संस्कृत सीरिज, वेनारस, 1935।
10. श्रीमद्भगवद्गीता स्वामी रामसुखदास गीताप्रेस-पुनः संस्करणम्-2017
11. संस्कृतनिबन्धशतकम् डाँ कपिलदेव द्विवेदी वि.वि. प्रकाशन,वाराणसी- 2008